# અભયઙ્કરં શિવરક્ષ સ્તોત્રમ

## Abhayankaram Shivaraksha Stotram

અભયઙ્કરં શિવરક્ષાસ્તોત્રમ |

અસ્ય શ્રીશિવરક્ષાસ્તોત્રમન્ત્રસ્ય યાજ્ઞવલ્ક્ય ઋષિઃ,
શ્રીસદાશિવો દેવતા, અનુષ્ટુપ છન્દઃ,
શ્રીસદાશિવપ્રીત્યર્થં શિવરક્ષાસ્તોત્રજપે વિનિયોગઃ ||

ચરિતં દેવદેવસ્ય મહાદેવસ્ય પાવનમ |
અપારં પરમોદારં ચતુર્વર્ગસ્ય સાધનમ ||૧||

ગૌરીવિનાયકોપેતં પઞ્ચવક્ત્રં ત્રિનેત્રકમ |
શિવં ધ્યાત્વા દશભુજં શિવરક્ષાં પઠેન્નરઃ ||૨||

ગઙ્ગાધરઃ શિરઃ પાતુ ભાલમર્ધેન્દુશેખરઃ |
નયને મદનધ્વંસી કર્ણૌ સર્પવિભૂષણઃ ||૩||

ઘ્રાણં પાતુ પુરારાતિર્મુખં પાતુ જગત્પતિઃ |
જિહ્વાં વાગીશ્વરઃ પાતુ કન્ધરાં શિતિકન્ધરઃ ||૪||

શ્રીકણ્ઠઃ પાતુ મે કણ્ઠં સ્કન્ધૌ વિશ્વધુરન્ધરઃ |
ભુજૌ ભૂભારસંહર્તા કરૌ પાતુ પિનાકધૃક ||૫||

હૃદયં શઙ્કરઃ પાતુ જઠરં ગિરિજાપતિઃ |
નાભિં મૃત્યુઞ્જયઃ પાતુ કટી વ્યાઘ્રાજિનામ્બરઃ ||૬||

સક્થિની પાતુ દીનાર્તશરણાગતવત્સલઃ |
ઊરૂ મહેશ્વરઃ પાતુ જાનુની જગદીશ્વરઃ ||૭||

જઙ્ઘે પાતુ જગત્કર્તા ગુલ્ફૌ પાતુ ગણાધિપઃ |
ચરણૌ કરુણાસિન્ધુઃ સર્વાઙ્ગાનિ સદાશિવઃ ||૮||

એતાં શિવબલોપેતાં રક્ષાં યઃ સુકૃતી પઠેત |
સ ભુક્ત્વા સકલાન્કામાન શિવસાયુજ્યમાપ્નુયાત ||૯||

ગ્રહભૂતપિશાચાદ્યાસ્ત્રૈલોક્યે વિચરન્તિ યે |
દૂરાદાશુ પલાયન્તે શિવ નામાભિરક્ષણાત ||૧૦||

અભયઙ્કરનામેદં કવચં પાર્વતીપતેઃ |
ભક્ત્યા બિભર્તિ યઃ કણ્ઠે તસ્ય વશ્યં જગત્રયમ ||૧૧||

ઇમાં નારાયણઃ સ્વપ્ને શિવરક્ષાં યથાદિશત |
પ્રાતરુત્થાય યોગીન્દ્રો યાજ્ઞવલ્ક્યસ્તથાઽલિખત ||૧૨||

ઇતિ શ્રીયાજ્ઞવલ્ક્યપ્રોક્તમભયઙ્કરં શિવરક્ષાસ્તોત્રં સંપૂર્ણમ ||

**www.shaivam.org**